श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.11- द्वितीय सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(म्) व्यासं(न्), ततो जयमुदीरयेत्॥**
**नामसङ्कीर्तनं(म्) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥**

**श्रीमद्भागवतमहापुराणम्**

**एकादशः स्कन्धः**

**॥ अथैकादशोऽध्यायः ॥**

## श्रीभगवानुवाच

**बद्धो मुक्त इति व्याख्या, गुणतो मे न वस्तुतः ।**
**गुणस्य मायामूलत्वान्- न मे मोक्षो न बन्धनम् ॥ 1॥**

माया+ मूलत्+ वान्

**शोकमोहौ सुखं(म्) दुःखं(न्), देहापत्तिश्च मायया ।**
**स्वप्नो यथाऽऽत्मनः(ख्) ख्यातिः(स्), सं(व्)सृतिर्न तु वास्तवी ॥ 2॥**

देहापत्+ तिश्च , सं(व्)सृतिर्+ न

**विद्याविद्ये मम तनू , विद्ध्युद्धव शरीरिणाम् ।**
**मोक्षबन्धकरी आद्ये, मायया मे विनिर्मिते ॥ 3॥**

विद्+ ध्युद्+ धव

एकस्यैव ममां(व्)शस्य, जीवस्यैव महामते ।
बन्धोऽस्याविद्ययानादिर्- विद्यया च तथेतरः ॥ 4॥

बन्धोऽस्+ याविद्यया+ नादिर्

अथ बद्धस्य मुक्तस्य, वैलक्षण्यं(म्) वदामि ते ।
विरुद्धधर्मिणोस्तात, स्थितयोरेकधर्मिणि ॥ 5॥

विरुद्ध+ धर्मिणोस्+ तात, स्थित+ योरे+ कधर्मिणि

सुपर्णावेतौ सदृशौ सखायौ,
यदृच्छयैतौ कृतनीडौ च वृक्षे ।
एकस्तयोः(ख्) खादति पिप्पलान्न-
मन्यो निरन्नोऽपि बलेन भूयान् ॥ 6॥

सुपर्णा+ वेतौ ,यदृच्+ छयैतौ ,पिप्+ पलान्+ न ,निरन्+ नोऽपि

आत्मानमन्यं(ञ्) च स वेद विद्वा-
नपिप्पलादो न तु पिप्पलादः ।
योऽविद्यया युक् स तु नित्यबद्धो,
विद्यामयो यः(स्) स तु नित्यमुक्तः ॥ 7॥

आत्मा+ नमन्यं(ञ्), नपिप्+ पलादो

देहस्थोऽपि न देहस्थो, विद्वान् स्वप्नाद् यथोत्थितः ।
अदेहस्थोऽपि देहस्थः(ख्), कुमतिः(स्) स्वप्नदृग् यथा ॥ 8॥

अदेहस्+ थोऽपि

इन्द्रियैरिन्द्रियार्थेषु , गुणैरपि गुणेषु च ।
गृह्यमाणेष्वहं(ङ्)कुर्यान्- न विद्वान् यस्त्वविक्रियः ॥ 9॥

इन्द्रियै+ रिन्द्रि+ यार्थेषु , गृह्य+ माणेष्+ वहं(ङ्)+ कुर्यान् , यस्त्व+ विक्रियः

दैवाधीने शरीरेऽस्मिन्, गुणभाव्येन कर्मणा ।
वर्तमानोऽबुधस्तत्र, कर्तास्मीति निबद्ध्यते ॥ 10॥

वर्तमानोऽ+ बुधस्+ तत्र, निबद्+ ध्यते

एवं(म्) विरक्तः(श्) शयने, आसनाटनमज्जने ।
दर्शनस्पर्शनघ्राण- भोजनश्रवणादिषु ॥ 11॥

आसना+ टन+ मज्जने ,दर्शन+ स्पर्श+ नघ्राण ,भोजन+ श्रवणा+ दिषु

न तथा बद्ध्यते विद्वां(व्)स्- तत्र तत्रादयन् गुणान् ।
प्रकृतिस्थोऽप्यसं(व्)सक्तो, यथा खं(म्) सवितानिलः ॥ 12॥

प्रकृतिस्थोऽ+ प्यसं(व्)सक्तो

वैशारद्येक्षयासं(ङ्)ग- शितया छिन्नसं(व्)शयः ।
प्रतिबुद्ध इव स्वप्नान्- नानात्वाद् विनिवर्तते ॥ 13॥

वैशा+ रद्येक्षया+ सं(ङ्)ग , छिन्+ नसं(व्)शयः

यस्य स्युर्वीतसं(ङ्)कल्पाः(फ्), प्राणेन्द्रियमनोधियाम् ।
वृत्तयः(स्) स विनिर्मुक्तो, देहस्थोऽपि हि तद्गुणैः ॥ 14॥

स्युर्+ वीत+ सं(ङ्)कल्पाः(फ्) ,
प्राणेन्द्रिय+ मनोधियाम् ,देहस्+ थोऽपि

यस्यात्मा हिं(व्)स्यते हिं(व्)स्रैर्- येन किं(ञ्)चिद् यदृच्छया ।
अर्च्यते वा क्वचित्तत्र, न व्यतिक्रियते बुधः ॥ 15॥

हिं(व्)स्+ रैर् , क्वचित्+ तत्र , व्यति+ क्रियते

न स्तुवीत न निन्देत, कुर्वतः(स्) साध्वसाधु वा ।
वदतो गुणदोषाभ्यां(म्), वर्जितः(स्) समदृङ्मुनिः ॥ 16॥

न कुर्यान्न वदेत् किं(ञ्)चिन्- न ध्यायेत् साध्वसाधु वा ।
आत्मारामोऽनया वृत्त्या, विचरेज्जडवन्मुनिः ॥ 17॥

साध्व+ साधु ,आत्मा+ रामोऽ+ नया ,विचरेज्+ जड+ वन्मुनिः

शब्दब्रह्मणि निष्णातो, न निष्णायात् परे यदि ।
श्रमस्तस्य श्रमफलो, ह्यधेनुमिव रक्षतः ॥ 18॥

शब्द+ ब्रह्मणि, ह्यधे+ नुमिव

गां(न्) दुग्धदोहामसतीं(ञ्) च भार्यां(न्),
देहं(म्) पराधीनमसत्प्रजां(ञ्) च ।
वित्तं(न्) त्वतीर्थीकृतमं(ङ्)ग वाचं(म्),
हीनां(म्) मया रक्षति दुःखदुःखी ॥ 19॥

दुग्धदोहा+ मसतीं(ञ्) ,पराधी+ नमसत्+ प्रजां(ञ्) , त्वतीर्थी+ कृतमं(ङ्)ग

यस्यां(न्) न मे पावनमं(ङ्)ग कर्म,
स्थित्युद्भवप्राणनिरोधमस्य ।
लीलावतारेप्सितजन्म वा स्याद्-
वन्ध्यां(ङ्) गिरं(न्) तां(म्) बिभृयान्न धीरः ॥ 20॥

स्थित्युद्+ भवप्राण+ निरो+ धमस्य ,लीला+ वतारेप्+ सितजन्म

एवं(ञ्) जिज्ञासयापोह्य, नानात्वभ्रममात्मनि ।
उपारमेत विरजं(म्), मनो मय्यर्प्य सर्वगे ॥ 21॥

जिज्ञासया+ पोह्य ,नानात्व+ भ्रम+ मात्मनि ,मय्यर्+ प्य

यद्यनीशो धारयितुं(म्), मनो ब्रह्मणि निश्चलम् ।
मयि सर्वाणि कर्माणि, निरपेक्षः(स्) समाचर ॥ 22॥

श्रद्धालुर्मे कथाः(श्) शृण्वन्, सुभद्रा लोकपावनीः ।
गायन्ननुस्मरन् कर्म, जन्म चाभिनयन् मुहुः ॥ 23॥

गायन्+ ननु+ स्मरन्

मदर्थे धर्मकामार्था- नाचरन् मदपाश्रयः ।
लभते निश्चलां(म्) भक्तिं(म्), मय्युद्धव सनातने ॥ 24॥

मय्युद्+ धव

सत्सं(ङ्)गलब्धया भक्त्या , मयि मां(म्) य उपासिता ।
स वै मे दर्शितं(म्) सद्भि- रं(ञ्)जसा विन्दते पदम् ॥ 25॥

सत्सं(ङ्)ग+ लब्धया

**उद्धव उवाच**

**साधुस्तवोत्तमश्लोक, मतः(ख्) कीदृग्विधः(फ्) प्रभो ।**

**भक्तिस्त्वय्युपयुज्येत, कीदृशी सद्भिरादृता ॥ 26॥**

साधुस्+ तवोत्+ तमश्लोक , कीदृग्+ विधः(फ्) ,

भक्तिस्+ त्वय्युप+ युज्येत ,सद्+ भिरा+ दृता

**एतन्मे पुरुषाध्यक्ष, लोकाध्यक्ष जगत्प्रभो ।**

**प्रणतायानुरक्ताय, प्रपन्नाय च कथ्यताम् ॥ 27॥**

प्रणताया+ नुरक्ताय

**त्वं(म्) ब्रह्म परमं(म्) व्योम, पुरुषः(फ्) प्रकृतेः(फ्) परः ।**

**अवतीर्णोऽसि भगवन्, स्वेच्छोपात्तपृथग्वपुः ॥ 28॥**

स्वेच्छो+ पात्+ तपृथग्+ वपुः

**श्रीभगवानुवाच**

**कृपालुरकृतद्रोहस्- तितिक्षुः(स्) सर्वदेहिनाम् ।**

**सत्यसारोऽनवद्यात्मा, समः(स्) सर्वोपकारकः ॥ 29॥**

कृपालु+ रकृत+ द्रोहस् ,

सत्यसारोऽ+ नवद्यात्मा ,सर्वो+ पकारकः

**कामैरहतधीर्दान्तो, मृदुः(श्) शुचिरकिं(ञ्)चनः ।**

**अनीहो मितभुक् शान्तः(स्), स्थिरो मच्छरणो मुनिः ॥ 30॥**

कामै+ रहतधीर्+ दान्तो , शुचि+ रकिं(ञ्)चनः

**अप्रमत्तो गभीरात्मा, धृतिमां(ञ्)जितषड्गुणः ।**

**अमानी मानदः(ख्) कल्पो, मैत्रः(ख्) कारुणिकः(ख्) कविः ॥ 31॥**

धृति+ मां(ञ्)जित+ षड्गुणः

**आज्ञायैवं(ङ्) गुणान् दोषान्, मयाऽऽदिष्टानपि स्वकान् ।**

**धर्मान् सन्त्यज्य यः(स्) सर्वान्, मां(म्) भजेत स सत्तमः ॥ 32॥**

मयाऽऽ+ दिष्टा+ नपि , सन्+ त्यज्य

ज्ञात्वाज्ञात्वाथ ये वै मां(म्), यावान् यश्चास्मि यादृशः ।
भजन्त्यनन्यभावेन, ते मे भक्ततमा मताः ॥ 33॥

ज्ञात्वा+ ज्ञात्वा+ थ , यश्+ चास्मि ,भजन्त्य+ नन्य+ भावेन

मल्लिङ्गमद्भक्तजन- दर्शनस्पर्शनार्चनम् ।
परिचर्या स्तुतिः(स्) प्रह्व- गुणकर्मानुकीर्तनम् ॥ 34॥

मल्लिङ्+ गमद्+ भक्तजन ,दर्शन+ स्पर्श+ नार्चनम् , गुणकर्मा+ नुकीर्तनम्

मत्कथाश्रवणे श्रद्धा, मदनुध्यानमुद्धव ।
सर्वलाभोपहरणं(न्), दास्येनात्मनिवेदनम् ॥ 35॥

मदनुध्या+ नमुद्धव ,सर्वलाभो+ पहरणं(न्) ,दास्येनात्+ मनिवेदनम्

मज्जन्मकर्मकथनं(म्), मम पर्वानुमोदनम् ।
गीतताण्डववादित्र- गोष्ठीभिर्मद्गृहोत्सवः ॥ 36॥

मज्जन्म+ कर्मकथनं(म्) ,पर्वा+ नुमोदनम् ,

गीत+ ताण्डव+ वादित्र ,गोष्ठीभिर्+ मद्+ गृहोत्सवः

यात्रा बलिविधानं(ञ्) च, सर्ववार्षिकपर्वसु ।
वैदिकी तान्त्रिकी दीक्षा, मदीयव्रतधारणम् ॥ 37॥

सर्व+ वार्षि+ कपर्वसु ,मदी+ यव्रत+ धारणम्

ममार्चास्थापने श्रद्धा, स्वतः(स्) सं(व्)हत्य चोद्यमः ।
उद्यानोपवनाक्रीड- पुरमन्दिरकर्मणि ॥ 38॥

ममार्+ चास्थापने ,उद्यानो+ पवना+ क्रीड , पुरमन्दि+ रकर्मणि

सम्मार्जनोपलेपाभ्यां(म्), सेकमण्डलवर्तनैः ।
गृहशुश्रूषणं(म्) मह्यं(न्), दासवद् यदमायया ॥ 39॥

सम्मार्+ जनो+ पलेपाभ्यां(म्) ,सेकमण्ड+ लवर्तनैः ,गृह+ शुश्रू+ षणं(म्)

अमानित्वमदम्भित्वं(ङ्), कृतस्यापरिकीर्तनम् ।
अपि दीपावलोकं(म्) मे, नोपयुञ्ज्यान्निवेदितम् ॥ 40॥

अमा+ नित्व+ मदम्+ भित्वं(ङ्) , कृतस्या+ परिकीर्तनम् ,दीपा+ वलोकं(म्) ,नोप+ युञ्ज्यान्+ निवेदितम्

यद् यदिष्टतमं(म्) लोके, यच्चातिप्रियमात्मनः ।
तत्तन्निवेदयेन्मह्यं(न्), तदानन्त्याय कल्पते ॥ 41॥

यच्चाति+ प्रिय+ मात्मनः ,तत् + तन्+ निवेद+ येन्+ मह्यं(न्) ,तदा+ नन्त्याय

सूर्योऽग्निर्ब्राह्मणो गावो, वैष्णवः(ख्) खं मरुज्जलम् ।
भूरात्मा सर्वभूतानि, भद्र पूजापदानि मे ॥ 42॥

सूर्योऽग्निर्+ ब्राह्मणो

सूर्ये तु विद्यया त्रय्या, हविषाग्नौ यजेत माम् ।
आतिथ्येन तु विप्राग्र्ये, गोष्वं(ङ्)ग यवसादिना ॥ 43॥

वैष्णवे बन्धुसत्कृत्या, हृदि खे ध्याननिष्ठया ।
वायौ मुख्यधिया तोये, द्रव्यैस्तोयपुरस्कृतैः ॥ 44॥

बन्धु+ सत्+ कृत्या ,ध्या+ ननिष्ठया ,द्रव्यैस्+ तोय+ पुरस्कृतैः

स्थण्डिले मन्त्रहृदयैर्- भोगैरात्मानमात्मनि ।
क्षेत्रज्ञं(म्) सर्वभूतेषु , समत्वेन यजेत माम् ॥ 45॥

भोगै+ रात्मा+ नमात्मनि

धिष्ण्येष्वेष्विति मद्रूपं(म्), शङ्खचक्रगदाम्बुजैः ।
युक्तं(ञ्) चतुर्भुजं(म्) शान्तं(न्), ध्यायन्नर्चेत् समाहितः ॥ 46॥

धिष्ण्येष्+ वेष्विति ,शङ्ख+ चक्र+ गदाम्बुजैः, ध्यायन्+ नर्चेत्+ समाहितः

इष्टापूर्तेन मामेवं(म्), यो यजेत समाहितः ।
लभते मयि सद्भक्तिं(म्), मत्स्मृतिः(स्) साधुसेवया ॥ 47॥

प्रायेण भक्तियोगेन , सत्सं(ङ्)गेन विनोद्धव ।
नोपायो विद्यते सध्र्यङ्- प्रायणं(म्) हि सतामहम् ॥ 48॥

अथैतत् परमं(ङ्) गुह्यं(म्), शृण्वतो यदुनन्दन ।
सुगोप्यमपि वक्ष्यामि , त्वं(म्) मे भृत्यः(स्) सुहृत् सखा ॥ 49॥

सुगोप्+ यमपि

इति श्रीमद्भागवते महापुराणे पारमहंस्यां
संहितायामेकादशस्कन्धे एकादशोऽध्यायः ॥11॥

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।

